CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः॥ स्नानंदानंनायोहोयश्चचूडःमणोकृतं॥ तंदृष्ट्वासर्वमिहविलोभागीरथीतटे॥ श्रद्ध
याभक्तियुक्तस्तुगंगास्नात्वाविधानतः॥ ब्रह्महत्यादिपापेभ्यःकिंपुनस्तुप्यपातकी॥ कृमिकीटपतंगाद्या
येमृताजाह्नवीतटे॥ कूलास्थतंतियेदृष्ट्वास्तेपिंयांतिपरांगतिं॥ ज्येष्ठेमासिसितेपक्षेदशम्यांहस्तसंयुते॥ गंगो
तीरेतुपुरुषोनारीवाभक्तिभावतः॥ निशायांनाशकुर्यादुगादशविधैरहे॥ पुष्पैःसुगंधैःनैवेद्यैःफलैर्दश
दशोन्मितैः॥ प्रदीपैर्दशभिधूपैर्दशगंधसुरद्रुजैः॥ पूजयेज्जह्नुयादीमान्दशकृत्वोविधानतः॥ सान्यांस्तिलान्
सितेतोयेगंगायाःप्रसृतीर्दश॥ गुरुसक्तमजापित्वादशमंत्रान्॥ नमःशिवायेप्रथमंनारायणेयपरंततः॥
दशहरायेततस्तिगंगायैमंत्रणेषवो॥ स्नातःप्रणवादिश्चभवेद्दशदश॥ पूजाराधनजपोहोमोनैवमनुनास्मृ
तः॥ हैमारूप्येणवाकृत्वागंगामूर्तिविधायच॥ वस्त्रालंकारितवक्त्रंस्थूर्णकुंभस्यचोपरि॥ प्रतिष्ठाप्यार्चयेद्देवी
यंचामृतविशोधितां॥ चतुर्भुजांत्रिनेत्रांचजटीनघोवितां॥ लावण्यमृतनिस्यंदसंशिलष्टत्रयष्टिकां॥ पूर्णकुं

Kashi Maharahi Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भसितांभोजवरदाभयहस्तकरां॥ तत्तद्ध्यायेत्तु सोम्यांश्चचंद्रायुतसमप्रभां॥ चामरैर्वीज्यमानाश्चश्वे
तछत्रोपशोभितां॥ सुधाप्लावितभूपृष्ठांश्रुद्वगंधानुलेपनां॥त्रैलोक्यपूजितपदांरेवाषीतरभिष्टुतां
॥ध्यात्वासम्यङ्मनत्रेणधूपदीपोपहारतः॥ मानसांश्चविधिंबध्वेहिमवंतंभगीरथं॥ प्रतिमाग्रेसमभ्य
र्च्यचंदनाक्षतनर्मितान्॥ दशप्रस्थास्तिलाद्धाद्दशविप्रेभ्यआहरेत्॥पद्मलंचकुंजरःप्रस्थआढ़
कोद्रोणएवच॥ धान्यमानेषुबोध्याःक्रमशोमीनतुर्गुणाः॥ वस्त्रकल्पद्रुमकरीरिजलेचरान्॥
हंसकारंडकवकचक्रटिट्टिभसारसान्॥ यथाशक्तिस्वर्णरौप्यतांम्रपट्टविनिर्मितान्॥ अभ्यर्च्यगं
धकुसुमैर्गंगायांप्रदक्षिणेद्वतीं॥ एवंकृत्वाविधानेनचिंतयेच्छिवमव्ययं॥ पारुष्यमनृतंचैवपैशु
न्यंचापिसर्वशः॥ असंबंधोनमःधप्रलापश्चवाङ्मयंस्याच्चतुर्विधं॥ परद्रव्येष्वभिध्यानमनसानि
ष्टचिंतनं॥ वितथाभिनिवेशश्चमानसंत्रिविधंस्मृतं॥ अदत्तानामुपादानंहिंसाचैवाविधानतः॥ परदारोप

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सोदाचकाथिकं विविधंस्मृतं॥एतैरुविधैः पापैरुहजन्मसमुद्भवैः॥मुच्यतेनात्रसंदेहःसत्यमत्यंगदा
धर॥डुडुरेन्नरकान्घोरान्दृष्ट्वापूर्वान्नदृष्टवान्॥२ वक्ष्यमाणमिदंस्तोत्रंगंगाजेश्रद्धयाजपेत्॥ॐनमःशिवा
यैगंगायैशिवरायैनमोनमः॥नमस्तेविश्वरूपिण्यैब्रह्मरूप्यैनमोस्तुते॥नमस्तेरुद्ररूपिण्यैशंकरायैतेनमोनमः
वस्वरूपिण्यैनमोभवजमूर्त्तये॥सर्वस्यसर्वव्याधीनांभिषक्त्वेपूज्यैनमोस्तुते॥स्थास्नुजंगमसंभूतविषघ्न्यै
नमोस्तुते॥संसारविषनाशिन्यैजीवनायैनमोस्तुते॥नागेन्द्रनगसंहर्त्र्यैनागेश्वरायैनमोनमः॥शंतिसंतान
कारिण्यैनमस्तेश्रुद्रमूर्त्तये॥सर्वसंशुद्धिकारिण्यैनमःपापारिमूर्त्तये॥भुक्तिमुक्तिप्रदात्र्यैभद्रदायैनमो
नमः॥भोगोपभोगदात्र्यैभोगवत्यैनमोस्तुते॥मंदाकिन्यैनमस्तेस्तुस्वर्गदायैनमोनमः॥नमस्त्रैलोक्यभूषायै
त्रिपथायैनमोनमः॥नमस्त्रिशुक्लसंस्थायैत्रिमार्गायैनमोनमःत्रिदुःखशमनंस्तुत्यायैतेजोवत्यैनमोस्तुते॥नरायै
लिंगधारिण्यैनारायण्यैनमोनमः॥नमस्तेविश्वमुख्यायैरेवत्यैतेनमोनमः॥बृहत्यैतेनमस्तेस्तुलोकधात्र्यै

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नमोस्तुते॥नमस्तेविश्वमित्रायेनंदिन्यैनेनमोनमः॥पृथ्व्यैशिवामृतायैचसुधायैनमोस्तुते॥परापरतरातट्यो
तारायैतेनमोनमः॥पाशजालनिकृंतिन्यैअभिन्नायैनमोस्तुते॥शीतायैचवरिष्ठायैवरदायैनमोनमः॥
उत्तार्यैसुरवनग्ध्यैचसंजाविन्यैनमोस्तुते॥ब्रह्मिष्ठायैब्रह्मराजदुरितघ्नैनमोस्तुते॥प्रणतार्त्तिप्रभं
जिन्यैजगन्मात्रनमोस्तुते॥सर्वापत्प्रतिपक्षायैमंगलायैनमोनमः॥एरणागतदीनार्तपरित्राणपरायणे
॥सर्वस्यार्त्तिहरेदेवानारायणिनमोस्तुते॥निर्लुंपायैदुर्गहंत्रैरक्षायैतेनमानमः॥परापरतरायैचनमानि
वारणदायिनी॥गंगेममाग्रतोभूमाद्गंगेमेनिष्ठृष्ठतः॥गंगेपार्श्वयोरधिगंगेत्वय्यस्तुमेस्थितिः॥आदौत्व
मंतेमध्येचसर्वंत्वंगांगतेशिवे॥त्वमेवमूलप्रकृतिस्त्वंपुरुषःपरएवहि॥गंगेत्वंपरमात्माचशिवरूपेनमः
शिवे॥यदुंपठितिस्तोत्रंश्रणुयाच्छ्रद्धयायिवः॥दरधामुच्यतेपापैकायवाक्चित्तसंभवैः॥रोगस्तोमच्यते
रोगात्विपद्भ्यश्चविपद्गतः॥मुच्यतेबंधनाद्बद्धोभीतोभीतेःप्रमुच्यते॥सर्वान्कामानवाप्नोतिप्रेत्यचविंदे

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दिवंव्रजेत्॥ दिव्यविमानमारुह्यदिव्यस्त्रीपरिवीजितः॥ गृहेलिखितंयस्यस्तोत्रंतिष्ठतिधारितं नाग्निचार
भयंतस्यनसर्पोसिभयंक्वचित्॥ तस्यादंष्ट्राकृतंस्तोत्रंगंगाजलेस्थितः॥ यःपठेद्दंष्ट्राकृतंस्तवरिद्रोवा
पिवा मनः॥ सोपितत्फलमाप्नोतिगंगांसंपूज्ययत्नतः॥ पूर्वोक्तेनविधानेनयत्फलंसंप्रकार्त्तितं॥ यथागौरी
तथागंगातस्माद्गौर्मुखपूजनात्॥ योविधिर्विहितःसम्यक्स्तोत्रंगंगाप्रपूजने॥ यथात्वंतथाविस्तोयथात्वं
तुतथास्कंदो॥ उमायथातथागंगाचतुरूपेणसिद्धते॥ विष्णुरुद्रांतरचैवश्रीगौर्धीरंतरंतथा॥ गंगागौर्योरंत
रंचयोवेत्तेमूढधीस्तुसः॥ सितमकरनिषण्णंशुभ्रवर्णंत्रिनेत्रांकरधृतकलशोल्लसल्लाभीत्यभिष्टा॥ विधिह
रिहररूपांसेंदुकोटीरजुष्टाकलितसितदुकूलाजान्वीतोनमामि॥ ॥इतिश्रीरंष्ट्रास्तोत्रंसंपूर्णं॥ ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi